# Shri Ranganatha Stutimala

# શ્રીરઙ્ગનાથસ્તુતિમાલા

## Document Information

Text title : Ranganatha Stutimala

File name : ranganAthastutimAlA.itx

Category : vishhnu, shataka

Location : doc_vishhnu

Proofread by : Musiri Janakiraman

Description-comments : From stotrArNavaH 06-35

Latest update : August 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીરઙ્ગનાથસ્તુતિમાલા

વિઘ્નવિઘાતાય પરં ચિત્તાશ્રય વાહિનીપતિં રુચિરમ્ ।
સદ્રત્નાવલિવિતતં કમલાકરભાવતઃ પ્રથિતમ્ ॥ ૧॥

રાજદનલ્પકવનિતાસહવાસપરં સુચિન્તનીયપદમ્ ।
અમરકૃતાદરમાશ્રય રઙ્ગપતિં ચિત્ત સત્કવિપ્રથિતમ્ ॥ ૨॥

રઙ્ગેશ નામસદૃશં ખલુ ચેષ્ટિતં તે
    રથ્યાસુ હન્ત વનિતાં ચ પુરસ્કરોષિ ।
ગૃહ્ણાસિ વેષનિચયં ચ સહસ્રધા ત્વં
    લોકાંશ્ચ નર્તયસિ કર્મગુણૈર્નિબદ્ધાન્ ॥ ૩॥

રઙ્ગેશ તિષ્ઠસિ રમાનિકટે કુતસ્ત્વં
    નૃત્તાય કિં કથય યુક્તમિદં તથા ચેત્ ।
રત્નાકરસ્ય દુહિતા ખલુ સર્વદાત્રી
    ભક્તાય દાતુમિતિ કિન્નુ વિરક્તયત્નઃ ॥ ૪॥

સમ્રાજત્કમાલાઙ્ગકે સુવિમલે ભાસ્વદ્રથાઙ્ગપ્રિયે
    પદ્માનન્દવિધાયિનિ પ્રકલિતાવાસ્તે તવાસ્થેકથા ।
ભક્તાનામમૃતપ્રદે દ્વિજવરૈઃ સંસેવ્યપાદે સતિ
    શ્રીરઙ્ગોડુપદા(તા)વપૂર્વવિભવે કોઽસાવલજ્જઃ શશી (?) ॥ ૫॥

તિષ્ઠન્ કિં ગૃહકાર્યં કમલાયૈ રઙ્ગનાથ વેદયસિ ।
રત્નાકરતનયાયૈ ધનિકશ્વશુરત્વમેવમેવ ભુવિ ॥ ૬॥

શ્રિયઞ્ચ ભૂમિઞ્ચ સુપશ્યતાદ્ય
    શ્રીરઙ્ગબન્ધો ભવતોપદિષ્ટા ।
અસ્ત્યપ્રમાદાય ધનાધિકૈર્હિ
    કર્તવ્યતા કાર્યવશેન લોકે ॥ ૭॥

સૂર્યપ્રભાખ્યપેટીમધ્યેન્દ્રમણિપ્રભાસુપરિપાટી ।

રઙ્ગેન્દુદૃષ્ટિધાટી લસતિ સ્મરતાપપાત્રિતવધૂટી ॥ ૮॥

ભાસ્વન્મણ્ડલશોભિતે નરવરૈઃ સમ્માનિતે સત્કરૈઃ
    આજ્ઞાપાલનતત્પરાખિલજને હસ્ત્યશ્વસેનાધને ।
સિંહાઙ્કાસનશોભમાનવપુષિ પ્રોદ્વેજિતસ્વદ્વિષિ
    શ્રીરઙ્ગામ્બુધિમેખલાપરિવૃઢે વન્દીબુભૂષામહે ॥ ૯॥

કારુણ્યમઞ્જુલદરસ્મિતકાન્તિપૂરા
    શઙ્ખોપલાસિતશરીરસુકાન્તિધારા ।
આનન્દનીં કુવલયસ્ય ચિરં ગતવ
    સૂર્યપ્રભાપિ ભવતાસ્તિ શશિપ્રભેવ ॥ ૧૦॥

આરાધિતો દ્યુમણિનાસિ પુરા તદાનીં
    દત્તા કથં નુ ભવતે પરમા પ્રભા સ્વા ।
તેનાર્યમેવ ભુવને પ્રથિતેન ભાવ્યં
    પ્રાપ્તેન વિષ્ણુપદમપ્યરુણેન પૂર્વમ્ ॥ ૧૧॥

યા વિનતાનન્દનતા તાર્ક્ષ્યસ્ય હિ રઙ્ગધુર્ય વિખ્યાતા ।
તાં હંસાય ચ દિશતા પ્રથિતા ભવતા કૃપાકરતા ॥ ૧૨॥

તાવકમરાલપત્રં મનસામીશાદ્ય મૃગ્યતે ચિત્રમ્ ।
તવ ચ પદાબ્જં સત્રં વહતીદં કિં ન ચિત્રપદમિત્રમ્ ॥ ૧૩॥

સત્સ્વેવ પત્રિનિવહેષુ ચકોરચક્ર-
    ક્રૌઞ્ચાદિમેષુ જવનેષુ ચ રઙ્ગધુર્ય ।
સત્સઙ્ગમાપ કુત એષ સ રાજહંસઃ
    જ્ઞાતં નિદાનમિહ તન્મુખરાગ એવ ॥ ૧૪॥

હંસં ગતં ભવન્તં ભજન્તિ લોકાશ્ચ રઙ્ગશિશિરકર ।
યે તેઽહંસઙ્ગતતાં ભજન્તિ યુક્તં યથાક્રતુન્યાયાત્ ॥ ૧૫॥

શ્રીરઙ્ગનરપતે તવ સઙ્ગાત્સિંહઃ સ્વરૂપતાશાલી ।
સદ્વિપદમનાયાસં હિનસ્તિ વનદેશશયનમાતનુતે ॥ ૧૬॥

શ્રીરઙ્ગચન્દ્ર ભવદાસનસઙ્ગતોઽયં
    પઞ્ચાનનસ્તુ ચતુરાનનમત્યશેત ।
યત્સંજ્ઞયા ભવતિ યુક્તમિદં પરં તુ
    ષટ્પઞ્ચવક્ત્રસહિતાવપિ ચેતિ ચિત્રમ્ ॥ ૧૭॥

ઇભેન વૃત્તિં ચરતોઽસ્ય રઙ્ગિન્
    તવાસ્તિ સઙ્ગાદનિભાસ્યવૃત્તિઃ ।
વને કૃતાસક્તિરયં મૃગેન્દ્રોઽ-
    વને કૃતાસક્તિરિદં ચ ચિત્રમ્ ॥ ૧૮॥

સ્વામિન્ સુવર્ણશુભકેસરિવાહનશ્રી-
    રઙ્ગેશિતુસ્તવ ચ કુત્ર સુવર્ણલબ્ધિઃ ।
જ્ઞાતં દિશન્તિ કવયો ભવતે સુવર્ણ-
    જાતં હિ નામ તુ તથા ધનરક્ષણાય ॥ ૧૯॥

કમલસદનાઙ્ગપાલીકુઙ્કુમયુતતાવકાઙ્ગસૃતધૂલી ।
ઇભહિંસનકરવાલી વિલસતિ રઙ્ગક્ષમાપતે વ્યાલી ॥ ૨૦॥

હસ્તીષ્ટદાનતત્પર તદ્ધારણસાદરામમું ભુવને ।
આલોચ્ય મૃગવિશેષં રઙ્ગિન્ કિં શિક્ષયન્નધઃ કુરુષે ॥ ૨૧॥

વ્યાલીપ્રિયોઽસિ ભગવન્ ભુજગેન્દ્રતલ્પ
    તસ્માદમું વરહિતાં સુવિલક્ષ્ય યાલીમ્ ।
વાહાધિકારમદિશઃ પ્રબલં જનેભ્યો
    ગૃહ્ણાસિ સોઽઞ્જલિવધૂઃ સુવિચાર્યમેતત્ ॥ ૨૨॥

યાલીવાહનશોભિનિ કાલીકૃતદેવવૈરિમુખશશિનિ ।
રઙ્ગક્ષમામઘોનિ સ્તુતિક્રિયાકર્તૃતાં બુભૂપાનિ (બુભૂપાણિ) ॥ ૨૩॥

શેષસ્થિતિં ભૂષયતાપિ સમ્ય-
    ગશેષવૃત્તિર્ભવતોપક્લપ્તા ।
ન ચિત્રમેતત્ત્રિજગદ્વિરૂઢ-
    સ્વભાવશીલાકૃતિરૂપભાજા ॥ ૨૪॥

રઙ્ગેશિતા ત્વં સ ભુજઙ્ગવર્યઃ
    સમ્બન્ધિતાસ્તે હ્યુભયોઃ સમાના ।
ફણાં સુકાન્તાં ભવદઙ્ગજાત-
    વરાય યત્પ્રાદિશદેષ મુખ્યામ્ ॥ ૨૫॥

ઉત્સઙ્ગભાજા ભવતાદ્ય રાજ-
    ત્યત્યદ્ભુતં કુણ્ડલિરાજવર્યઃ ।
અમૂલ્યશક્રોપલદર્શનીયા

રઙ્ગપ્રભો સ્ફાટિકપેટિકેવ ॥ ૨૬॥

ચક્રિત્વકુણ્ડલિત્વે ગૂઢપદત્વં બિલેશયત્વં ચ ।
પર્યાયતોઽસ્ય યદ્વચ્છેષસ્ય તથા તવેત્યુભૌ મિલિતૌ ॥ ૨૭॥

આશ્રિતસુવર્ણગરુડં શ્રિતજનકલ્યાણસમ્પદાં નીડમ્ ।
કૃતરિક્તભાવપીડં ભજ રઙ્ગપતિં શ્રુતિત્રયીચૂડં ૨૮॥

આરુઢપક્ષિરાજે સેવાગતનિખિલનિર્જરસમાજે ।
હૃદય વસ રઙ્ગરાજે સુન્દરતરરૂપવિજિતચેતોજે ॥ ૨૯॥

અધિગતસુપર્ણવૃત્તો રઙ્ગપતિશ્ચાપિ કનકધારાણામ્ ।
દાતા ભવસિ સદા ત્વં રત્નાકરકન્યકાશ્રયેણ કિમુ ॥ ૩૦॥

મુષ્ણાસિ ચેતાંસિ ન ચિત્રમેતત્
કિશોરભાવે દધિહારિવૃત્તિઃ ।
પુષ્ણાસિ રઙ્ગાધિપ વીનશોભાં
નવીનશોભાકૃદસીતિ ચિત્રમ્ ॥ ૩૧॥

એતત્સહાયભૂમ્ના ધરણીજાતાપ્તિરિહ બભૂવ પુરા ।
કુશલવસુવૃદ્ધિહેતુસ્ત્વિતિ હિ સુવર્ણીકરોષિ કપિમેનમ્ ॥ ૩૨॥

તવ પરિચયતઃ કપિરપિ પીતામ્બરધરણમાતનુતે ।
નર ઇવ તથાપિ શાખાપરિચયતો નૈવ નિવવૃતે યુક્તમ્ ॥ ૩૩॥

અરુણમુખહનુમદંસપ્રતષ્ઠિતં ત્વાં સ્મરામિ સંલક્ષ્ય ।
ઇન્દિન્દિરસ્ય રઙ્ગિન્નશોકસુમગુચ્છવૃન્તલગ્નસ્ય ॥ ૩૪॥

નિશિચરલોકકૃતાન્તં નિજાંસભાગપ્રકાશિતાનન્તમ્ ।
ભક્તાવલિષુ મહાન્તં વિષયીકુરુ લોચને હનૂમન્તમ્ ॥ ૩૫॥

કલ્પતરુમૂલશાલિનમાકલયન્ કલ્પતે ભવાટવ્યાઃ ।
સઞ્ચરણાય ન ચૈનં પઞ્ચશરાભિખ્યચોરદુર્ગાયાઃ ॥ ૩૬॥

રઙ્ગિન્ પરિગ્રહવશાત્તવ કલ્પવૃક્ષો
દાતૃપ્રસિદ્ધિમગમત્ સતિ ચાન્યવૃક્ષે ।
સ્યાલં તમેનમપરં ચ વિચાર્ય વૃક્ષ-
મસ્યાલમસ્ય વિષયે સદનુગ્રહેણ ॥ ૩૭॥

સ્યાલત્વમેવ કલયન્નકૃથા વદાન્ય-

મેનં સ ચેન્મધુપસઙ્ગતિભાક્ સુરાણામ્ ।
પાતા ભવત્યહહ રઙ્ગપતે સુરદ્રુઃ ।
યત્સંવિચાર્ય કરણીયમતસ્ત્રિલોકે ॥ ૩૮॥

ભૂમૌ વદાન્યવિભવં કિમયં પ્રકાશં
કર્તું ભુવં સુરતરુર્હિ પરિષ્કરોતિ ।
સત્યુજ્જ્વલે સકલકલ્પકકલ્પકદ્રૌ
ત્વય્યેનમાશ્રયતુ કો જડભાવભાજમ્ ॥ ૩૯॥

ચન્દ્રપ્રભાપિ પ્રથતે પ્રભાતે
સઙ્ગેઽપિ ભાસ્વત્ત્વદુરુપ્રભાયાઃ ।
રઙ્ગપ્રભો યુક્તમિદં વિભાતિ
ભવત્પદાપ્તાવવિરોધિભાવઃ ॥ ૪૦॥

નામાયોગઃ ક્ષીણતા નૈવ બિમ્બે
સત્યેવં કિં ભાસ્વતાપ્રોત્વથાદ્ય ।
રઙ્ગિન્ સઙ્ગં ચન્દ્રમાઃ સ્યાદથૈવ-
માયોગં તે વીક્ષ્ય સક્તસ્ત્વપૂર્વમ્ ॥ ૪૧॥

તુભ્યં સ્વબિમ્બાદમૃતં સુધાંશૂ
રઙ્ગિન્ સમુદ્ધૃત્ય ગૃહાગતાય ।
તુભ્યં દદૌ રન્ધ્રમતોઽસ્ય જાતં
મધ્યેઽંશુકં ત્વં ચ દદાસિ તસ્મૈ ॥ ૪૨॥

સ્થાનં દદાવક્ષિણિ યસ્ય નિત્યં
તસ્મૈ ક્ષમઃ સ ક્ષણદાધિનાથઃ ।
દત્તે પ્રભામુત્સવવાસરે સ્વા
માદાનદાનોચિતમેવ પાત્રમ્ ॥ ૪૩॥

કરિવરમિહ પૂર્વં ગ્રાહબન્ધાદરક્ષ-
સ્તદધિગતગરિમ્ણા દન્તિવાહસ્પૃહાભૂત્ ।
તવ પતદિનવાહ ગ્રાહનિર્બન્ધતો માં
મદજુષમિહ મોક્તું કઃ સમર્થસ્ત્વદન્યઃ ॥ ૪૪॥

સદ્ગોત્રભેદપરદારરતં સુરેન્દ્રં
ત્યક્ત્વાગમત્ કથમસૌ સુરદન્તિરાજઃ ।
ગોત્રોદ્ધૃતૌ પ્રથિતધર્મજદારમાન-

દાને રતં ભુવિ સમીક્ષ્ય ભવન્તમેવ ॥ ૪૫॥

સુરદન્ત્યપિ બર્હિર્મુખભાવં ભજતે વિભો તવ તુ ।
દન્તીન્દ્રો બત રઙ્ગપતેઽશ્નાત્યઘાનિ સર્વેષામ્ ॥ ૪૬॥

સુરદન્તિનમાસાદ્ય ચ ચલસ્થિતિં કલયતે વિભો સુકૃતિ (સુકૃતી) ।
સુકૃતં નિનાશ્ય ભજતેઽચલસ્થિતિં ત્વાં ગજસ્થમાલોક્ય ॥ ૧૭॥

હારિદ્રચૂર્ણસુવિલેપનલોભનીયાં
મૂર્તિં કથં કલયસે બત રઙ્ગબન્ધો ।
આભીરવામનયના ઇવ વશ્નનીયા
નૈતાસ્તુ ચોલવનિતાઃ કુટિલસ્વભાવાઃ ॥ ૪૮॥

નીલામ્બુદપ્રકરકાન્તિસુહૃચ્છરીર
રમ્યદ્યુતે કથય કિં ભવિતું સુરક્તઃ ।
હારિદ્રચૂર્ણસુવિલેપનમાતનોષિ
કો વેદ રઙ્ગચરિતં ન જગત્પ્રસિદ્ધમ્ ॥ ૪૯॥

ચઞ્ચત્પયોધરરુચિં સુહરિદ્રયાક્તં
પીતામ્બરં ભ્રમતુ વીક્ષ્ય ચ દેહમદ્ય ।
પદ્માં તતઃ સવિધગાં સ્વવશં નયામો
રઙ્ગિન્ મનઃ કિમિતિ સાપિ ચ રઙ્ગનિષ્ઠા ॥ ૫૦॥

હારિદ્રચૂર્ણસઙ્ગાદુજ્જ્વલવપુષસ્તવ શ્રિયો રઙ્ગિન્ ।
ધિક્કુર્વન્તિ હિ શોભાં ધાતુવિચિત્રિતવિધૂપલગ્રાવ્ણઃ ॥ ૫૧॥

પરસ્પરં દર્પણદર્શનીયે ગણ્ડસ્થલે તે જયતઃ શ્રિયશ્ચ ।
સત્યોસ્તયોર્દર્પણધારણં કિં રઙ્ગેશ દ્રષ્ટું નુ સમં નિજાઙ્ગમ્ ॥ ૫૨॥

મુકુરસદનમધ્યસ્થાસ્નુ કિં નીલરત્નમ્ ।
સિતરુચિશુભરોચિ શ્યામલં કિં નુ નૂત્નમ્ ।
ઇતિ વિવિધપદવ્યા વર્ણિતં નિઃસપત્નં
ભવતુ સકલલલોકશ્રેયસે રઙ્ગરત્નમ્ ॥ ૫૩॥

મુકુરસદનમધ્યે પ્રસ્ફુરદ્દીપ્રરૂપં
દિશિ દિશિ ચ ભવન્તં વીક્ષ્ય પદ્મા દ્વિરૂપા ।
નયનહૃદયચોરં માયયા ધાવનોત્કં
બહુલકલિતરૂપં ત્વાં રુણદ્ધીતિ શઙ્કે ॥ ૫૪॥

પ્રતિફલસિ મુકુરદેશે જડેઽપિ હૃદયે ન મે કથં સ્ફુરસિ ।
વિમલય પદરજસા તત્સમલં ચેદ્રઙ્ગભૂમિપતે ॥ ૫૫॥

સ્વામિન્ યોષાદ્વયમપિ રઙ્ગક્ષ્માપાલ યુક્તમેવ તવ ।
એકપ્રકૃતિકતાપિ ચ તયોર્મુદે તે ભવત્યધિકમ્ ॥ ૫૬॥

પાર્શ્વદ્વયેઽપિ લક્ષ્મીભૂમ્યોર્મધ્યસ્થતાં પ્રપન્નેન ।
રઙ્ગિન્ ભવતા ભાર્યાદ્વયાનુસૃતિરત્ર શિક્ષ્યતે નુણામ્ ॥ ૫૭॥

સેનેશપ્રમુખેષુ વિશ્વજનિષુ ત્વચ્છાસનપ્રેપ્સુષુ
    સ્વામિન્ સત્સુ કથં નુ ધાન્યગણનાં ત્વં દ્રષ્ટુમુદ્યુઞ્જસે ।
કાર્પણ્યાત્ સ ભવાન્ન વિશ્વસિતિ કિં કાર્પણ્યમાત્રૈર્નરૈ-
    સ્તુભ્યં વેદ્યત એવ તત્પરિચયાજ્જાતં સ્થિરં કિં ત્વયિ ॥ ૫૮॥

સ્વયમેવ ધાન્યગણનાં પશ્યતિ સતિ ભવતિ સત્સુ મિત્રેષુ ।
મિત્રં હેમ્નોઽર્થેઽલં ધાન્યાર્થે સ્વયમિતિ સ્ફુટા નીતિઃ ॥ ૫૯॥

કથં નિશીથેઽસ્ત્વભિષેકકાલસ્તવ શ્રિયશ્ચાપિ ચ રઙ્ગબન્ધો ।
કાલવ્યવસ્થા ભવતા કૃતૈવ યદ્વા સ કાલો યુવયોઃ પ્રભુર્ન ॥ ૬૦॥

ગર્ભીકૃતાનિ ભુવનાનિ બહૂન્નતે શ્રી-
    રઙ્ગક્ષમાદયિત સન્તિ તથાપિ ચાદ્ય ।
યન્મજ્જનં તવ ચ વક્ષસિ સંસ્ફુરન્ત્યા
    લક્ષ્મ્યાશ્ચ સાધુ ભુવનૈરિતિ ચિત્રમેતત્ ॥ ૬૧॥

સુવિમલપવિત્રવપુષોર્ભવતોઃ શ્રીરઙ્ગનાયકૌ સ્નાનમ્ ।
સમ્પશ્યતાં નરાણામલમશુચિં વ્યપોહતિ વિચિત્રમ્ ॥ ૬૨॥

શિબિકાન્તઃસ્ફૂર્તિરિયં યુક્તં પુરુષાર્થદાનનિરતસ્ય ।
રઙ્ગેન્દૌ સ્ફુરતિ દિને રૂપં હ્યકલઙ્કમસિતમિતિ ચિત્રમ્ ॥ ૬૩॥

સઙ્કેતમૈશ્વરં યન્ન સદર્થં નૈવ તદ્વિભાતિ મમ ।
ચતુરન્તત્વં ભજતે વાહનમિદમદ્ય યેન રઙ્ગપતે ॥ ૬૪॥

દાનં શોભનકરતા સ્વવશાગતહાર્દવૃતિયુક્તમ્ ।
સદ્યૂથપતે તવ બત શિબિકારોહો રજસ્કતાપ્યન્તે ॥ ૬૫॥

સ્વામિન્ જગદ્ગુરુરસિ પ્રથતે ચ ભાર-
    વાહો વહન્તિ બત પઞ્ચજનાસ્ત એતે ।

આલોચયંસ્તવ સુવૈભવમદ્ભુતસ્ય
    વાસં દિશેન્ન હૃદયે ભુવિ રઙ્ગભૂપ ॥ ૬૬॥

ઘોટોદ્યત્ખરકૂટગાઢઘટનાસઞ્જાતભૂયોરજઃ-
    પાલીફેનરસાર્દિતા સમલગન્મેરોસ્તવોર્ધ્વસ્થલે ।
રઙ્ગિન્ દેવપદં તતો વિરચિતં તસ્યાં ધરિત્ર્યાં ન ચેત્
    ઇત્થં રાજસમાધિકારિકપદં વિજ્ઞૈઃ કુતઃ કથ્યતે ॥ ૬॥

ચઞ્ચદ્ભવદ્ઘોટખુરાભિઘાતમાશઙ્ક્ય સૂર્યોઽગમદસ્તશૈલમ્ ।
ચન્દ્રેઽસ્તિ લગ્નં તદિદં હિ ચિહ્નં રવેસ્તદારભ્ય તથૈવ વૃત્તિઃ ॥ ૬૮॥

રઙ્ગિન્ ભવદ્ઘોટશિખાનિબદ્ધ-
    ભૂષાવિશેષોલ્લસિતોર્ધ્વસીમ્નઃ ।
ચઞ્ચસ્ત્વરાપસૃતિસાહચર્યં
    સચ્ચામરૌ પાર્શ્વયુગે દધાતે ॥ ૬૯॥

મદ્વૃત્તિયોગ્યોઽર્હતિ જિહ્મગત્વ-
    મિત્થં તદધ્યાપયસીવ સપ્તિમ્ ।
આસ્તામિદં તાર્ક્ષ્યમથોઽમૃતસ્ય
    દાતા ત્વયં તદ્વિષદો ન હિ સ્યાત્ ॥ ૭૦॥

મોચેક્ષુમધુરવૃત્તૌ પત્રિપ્રવરોજ્જ્વલે રથે વૃત્તિઃ ।
સદ્રૂપશોભિતેઽસ્મિન્નુદ્યાને રઙ્ગભૂપ યુક્તમિદમ્ ॥ ૭૧॥

કૃતપ્રતિકૃતં ભુવિ પ્રથિતમેવ રઙ્ગપ્રભો
    યદત્ર મનુજા ભવત્સમુપકૃષ્ટચિત્તાસ્તદા ।
ભવદ્રથસુકર્ષણાદિહ કૃતજ્ઞતાં તન્વતે
    ક્ષમં ખલુ યતસ્તુતૈર્જયતિ નિત્યસખ્યં તવ ॥ ૭૨॥

અધિગતરથં ભવન્તં પશ્યન્તો ભુવિ મનોરથં પ્રાપ્ય ।
મોદન્તે રઙ્ગપતે દાતા ત્વં ખલુ મનઃપૂર્વમ્ ॥ ૭૩॥

આલોક્ય રથનિવિષ્ટં નિત્યસુતુષ્ટં જગલ્લયે શિષ્ટમ્ ।
ન ભજતિ કદાપિ કષ્ટં રઙ્ગિણમિષ્ટં જનો દૃશા સ્પષ્ટમ્ ॥ ૭૪॥

આરોહતિ સ્યન્દનમમ્બુજાક્ષે રોહન્તિ ચક્ષૂંષિ તમાશ્રિતાનામ્ ।
તસ્મિન્ન ચક્ષુર્વિષયે મનાંસિ તત્સ્થાનમેષાં તુ સમાક્રમન્તિ ॥ ૭૫॥

શ્રીરઙ્ગનાથ નવમોત્સવવાસરેષુ

યે તીર્થવારિણિ નિમજ્જનમાચરન્તિ ।
તે બાહ્યમાન્તરતમં ચ રજો વ્યપોહ્ય
જન્માન્તરેઽપિ શુચિતામુપયાન્તિ હુન્ત ॥ ૭૬॥

શ્રીરઙ્ગરાજ કિમિદં વિપરીતમાસ્તે
યસ્તીર્થવારિષુ વિગાહનમાતનોતિ ।
પુંસોઽપિ તસ્ય રજસા વિગમોઽપિ સત્ત્વ
પ્રાદુર્ભવશ્ચ શુચિભૂતશરીરતા ચ ॥ ૭૭॥

પરિણીતામપિ પદ્માં વર્ષે વર્ષે કિં તુ પરિણયસિ ।
પ્રણયવશા ખલુ નવા નવા સા વિભાતિ રઙ્ગવિભો ॥ ૭૮॥

જિતેન્દ્રિયોઽસ્મીતિ બભાણ પૂર્વં
રઙ્ગક્ષમાપાલક યાદવત્વે ।
રુચિર્વિવાહે કથમાવિરાસી-
જ્જ્ઞાતં પતત્રીશ્વરવાહનોઽસિ ॥ ૭૯॥

પ્રાપ્તાબ્જોદરરમ્યકાન્તિ ભવતો રઙ્ગેશ દૃષ્ટ્યોર્યુગં
કુઞ્ચદ્વક્ત્રસરોજવાસરસિકાપાદાબ્જયોઃ સંસ્ફુરત્ ।
પશ્યદ્ભિઃ પ્રણયાપરાધકુપિતાં પદ્માં પદામ્ભોજયોઃ
પાણિભ્યામગૃહીસ્ત્વમિત્યનુકલં લોકૈઃ સમાલોક્યસે ॥ ૮૦॥

પરિણયવિધૌ ન ભવતો રઙ્ગપતે માતુલાહેર્વાહઃ ।
ન હિ હીનતા તતઃ સ્યાદહીનવૃત્ત્યોઃ સદા યુવયોઃ ॥ ૮૧॥

ડોલાધિરોહસ્તવ રઙ્ગધુર્ય-
પ્રભો વિવાહે ભવતીતિ ચિત્રમ્ ।
પિતા પુરાણોઽસિ ભવાન્ રમાપિ
પ્રસૂર્જનાનામિતિ વિશ્રુતા યત્ ॥ ૮૨॥

પરિણયનવિધૌ તે રઙ્ગબન્ધો રમાયાઃ
કરતલકૃતમલ્લીસૂનગુચ્છાત્ પતદ્ભિઃ ।
અરુણમણિધરિત્ર્યાં પુષ્પવૃન્દૈર્વિશીર્ણૈઃ
કૃત ઇવ હિ હુતાશે લાજહોમપ્રકારઃ ॥ ૮૩॥

કસ્ત્વં રઙ્ગપતિઃ પ્રદર્શય શુભં વેષ નુ કિં દીયતે
કિં તેઽભીષ્ટતમં દદાસિ યદિ તત્ તદ્વાઞ્છિતં કથ્યતે ।

અદ્યૈવાભિગૃહાણ તે પરિણયે વાઞ્છેતિ માં લોભયન્
    અન્યોન્યાલપનેન સોઽયમધુના ગૃહ્ણાતિ તસ્યાઃ કરમ્ ॥ ૮૪॥

કરગ્રહવિધૌ શ્રિયો મણિમયાવનૌ બિમ્બિતં
    જિઘૃક્ષતિ કરં તદા ભવતિ રઙ્ગપૃથ્વીપતે ।
કરગ્રહસમર્થતા બત નૃપેત્યનાકર્ણયન્
    સખીગિરમિવ પ્રભો લિખસિ લજ્જયા ભૂતલે ॥ ૮૫॥

ઉદ્વાહ્ય પદ્માં ધરણીઞ્ચ તાભ્યાં પદ્માલયાદ્રઙ્ગપતેઽર્ધવીથ્યા ।
ત્વાં સમ્પ્રયાન્તં સદનં નિરીક્ષ્ય નો યાન્તિ યામ્યં સદનં પુમાંસઃ ॥ ૮૬॥

રાજ્યૌ ન દૃશ્યે સકલૈરિતિ ત્વં
    પ્રાવૃત્ય વસ્ત્રૈઃ શિબિકાં પ્રયાસિ ।
યુક્તં હિ રાજ્ઞસ્તવ તત્પરં દુ
    નાન્યે પુમાંસોઽત્ર તનૂભવેભ્યઃ ॥ ૮૭॥

પદ્માવનિભ્યાં રુચિરદ્વિપાર્શ્વે
    શ્રીરઙ્ગધાત્રીપતિસાર્વભૌમઃ ।
ચામ્પેયગુચ્છાવલિમધ્યગાલિ-
    રીતિં હ્યપૂર્વાં પ્રકટીકરોતિ ॥ ૮૮॥

પાર્શ્વદ્વયગતમહિલં પરમપુમાંસં પયોજપદમૃદુલમ્ ।
પરતરચઞ્ચત્ખુરલં પશ્ય વિલોચનપયોજરુચિતરલમ્ ॥ ૮૯॥

વ્યાલમ્બિકુસુમમાલં જગદવનાસક્તસકલશુભલીલમ્ ।
ઉજ્જ્વલવાસવનીલં હૃદયે કુરુ જન તમેનમયમૂલમ્ ॥ ૯૦॥

જાગરણકિઞ્ચિદરુણપ્રભાક્ષિનીલોત્પલપ્રભાપૂરૈઃ ।
શ્રિતજનતામ્બૂલભારં રઙ્ગપતે ત્વં દદાસીવ ॥ ૯૧॥

પરિણયકાલે રાજ્ઞાં મુચ્યન્તે નિગલબદ્ધજનવૃન્દાઃ ।
ભવતા કિં રઙ્ગપતે બધ્યન્તે પ્રેમપાશતઃ સર્વે ॥ ૯૨॥

રક્ષા શ્રુતા યથા વા ભવતો ન તથા કિમાશ્રિતાનાં ચ ।
સ્વવશા નિરાશ્રયાશ્ચેદિતિ કિં રઙ્ગિન્ શ્રિતાઘમભિહન્સિ ॥ ૯૩॥

પૂર્વં યાદવતાયામુક્તં ગોપૈરવાદ્યઘોષમિતિ ।
તત્પરિચયવશતઃ કિં હ્યવાદ્યઘોષં વિરાજસે રઙ્ગિન ॥ ૯૪॥

સ્કન્ધસ્ય રુચિકૃદેતદ્વાહનમિતિ લોભયન્મનુજાન્ ।
સંવાહ્ય તૈશ્ચ રઙ્ગિન્ ધત્સે તેષાં ભરન્યાસમ્ ॥ ૯૫॥

તોલુક્કિનિયાનિતિ હિ પ્રસિદ્ધિરેતસ્ય વાહનસ્ય ભુવિ ।
રઙ્ગપતે લોચનયોરપ્યેતદ્રોચતે નિતરામ્ ॥ ૯૬॥

નિગમશિખરોક્તમધુના પ્રકટીકુર્વન્ વિરાજસે શબ્દઃ (શબ્દમ્) ।
દશમામુત્સવરાત્રિં નવમાન્તેનાતનોષિ રઙ્ગપતે ॥ ૯૭॥

પુષ્પશિબિકાન્તરઙ્ગે દુષ્પરિહરપાપભઞ્જનોત્તુઙ્ગે ।
તનુકાન્તિજિતાનઙ્ગે ધિનુ સઙ્ગં ચિત્ત રઙ્ગિણિ શુભાઙ્ગે ॥ ૯૮॥

વહન્ત એતે જડસાલભઞ્જિકાકૃતીન્નરાન્ વીક્ષ્ય ચ રાઘવત્વે ।
શિલાવધૂકૃત્કપટત્વધારિણીં સઞ્ચિન્ત્ય રઙ્ગિન્ સ્વવશેઽદ્ય સન્તિ ॥ ૯૯॥

શિબિકાદણ્ડકૃતાંસપ્રતિમા રઙ્ગિન્ વિભીષયન્તીવ ।
વહતો ભગવદ્દૃષ્ટા વયમપિ શક્નુમોઽત્રેતિ ॥ ૧૦૦॥

કુસુમચતુરન્તયાને શોભિનિ યદ્વત્ કુબેરસુવિમાને ।
સજલાપયોદાયમાને રમસ્વ રઙ્ગિણિ મનો રમેશાને ॥ ૧૦૧॥

પુષ્પોત્સવો યથામત્યમુષ્ય રઙ્ગપ્રભોરવર્ણિતરામ્ ।
કૌણ્ડિન્યવંશમુક્તામણિના શ્રીવિજયરાઘવાખ્યેન ॥ ૧૦૨॥

કવિગૌરવેણ નાસ્મિન્ રમતાં કવિપરિષદત્યુદારવચાઃ ।
કસ્ય કવેરસ્ય વિભોરુપરિ નિબદ્ધં સ્વદેત ન જગત્સુ ॥ ૧૦૩॥

રોગનિવારણકામૈઃ સહ્યન્તે હ્યૌષધેષુ કટુકત્વમ્ ।
ભવદૂરીકરણપરૈઃ સાધારણતાપિ ચાત્ર સોઢવ્યા ॥ ૧૦૪॥

રુચિરાર્થેષુ ન ગચ્છંસ્તેષાં દોષૈકદૃષ્ટિરિહ કોઽપિ ।
નિમ્બદલરુચિરભાવામૌષ્ટ્રીં રીતિં સમેતુ કા હાનિઃ ॥ ૧૦૫॥

અવશેન ગૃહ્ણન્નામાપ્યજામિલો મુક્તિમેતિ કિલ વિદિતમ્ ।
જ્ઞાત્વા જનિતા કવિતા પ્રસવિષ્યતિ ભક્તિમદ્ભુતામસ્મિન્ ॥ ૧૦૬॥

રઙ્ગવિભુસ્તુતિમાલાં સ્વીકુરુતાં સ સ્વયં સુકારુણ્યાત્ ।
નિરવધિદયાપયોધિઃ શ્રીરઙ્ગનિવાસસાદરો ભૂમા ॥ ૧૦૭॥

સદ્ગુણગુમ્ભનમધુરાં ગ્રાહ્યાં સર્વૈર્વિશિષ્ય વિષયધુરામ્ ।
સ્તુતિમાલામમ્લાનાં સ્વીકુરુ રઙ્ગક્ષમાવિભો સ્વામિન્ ॥ ૧૦૮॥

॥ ઇતિ શ્રીરઙ્ગનાથસ્તુતિમાલા સમ્પૂર્ણા ॥

Proofread by Musiri Janakiraman

---

*Shri Ranganatha Stutimala*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*